# श्रीस्वामिनाथ षट्कं

हे स्वामिनाथार्त बन्धो ।
भस्म लिप्ताङ्ग गाङ्गेय कारुण्य सिन्धो ॥ १॥

रुद्राक्षधारि न्नमस्ते रौद्ररोगं हर त्वं पुरारेर्गुरोर्मे ।
राकेन्दु वक्त्रं भवन्तं माररूपं कुमारं भजे कामपूरम् ॥ २॥

मां पाहि रोगा दघोरात् मङ्गलापाङ्ग पातेन भङ्गात्स्वराणाम् ।
कालाच्च दुष्पाक कूलात् कालकालस्य सूनुं भजे क्रान्तसानुम् ॥ ३॥

ब्रह्मादयो यस्य शिष्याः ब्रह्मपुत्रा गिरौ यस्य सोपानभूताः ।
सैन्यं सुराश्चापि सर्वे सामवेदादि गेयं भजे कार्तिकेयम् ॥ ४॥

काषाय संवीत गात्रं कामरोगादि संहारि भिक्षान्न पात्रम् ।
कारुण्य सम्पूर्ण नेत्रं शक्तिहस्तं पवित्रं भजे शम्भु पुत्रम् ॥ ५॥

श्रीस्वामिशैले वसन्तं साधु सङ्घस्य रोगान् सदा संहरन्तम् ।
ओङ्कार तत्त्वं वदन्तं शम्भु कर्णे हसन्तं भजेऽहं शिशुं तम् ॥ ६॥

स्तोत्रं कृतं चित्रचित्रं दीक्षितानन्त रामेण सर्वार्थ सिद्ध्यै ।
भक्त्या पठेत् यः प्रभाते देवदेव प्रसादात् लभेताष्ट सिद्धिम् ॥

इति श्रीस्वामिनाथ षट्कं सम्पूर्णम् ।